श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे

# ॥ बिम्बप्रतिबिम्बपद्धतिः एकविंशी ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

# ॥ बिम्बप्रतिबिम्बपद्धतिः एकविंशी ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

शौरेः शुद्धान्तनारीणां विहारमणिदर्पणम्।
प्रसत्तेरिव संस्थानं पदत्राणमुपास्महे॥ **21.1** ॥

कमलापतिपादुके! कदाचित्
विहगेन्द्रस्त्वयि बिम्बितो विभाति।
सविलासगतेऽपि रङ्गभर्तुः
निजमात्मानमिवोपधातुकामः॥ **21.2** ॥

मणिपङ्क्तिषु ते दिशामधीशाः
प्रतिबिम्बानि निजानि वीक्षमाणाः।
अभियन्ति मुकुन्दपादुके! त्वाम्
अधिकारान्तरसृष्टिशङ्कयेव॥ **21.3** ॥

मणिमौळिशतेन बिम्बितेन
प्रणतानां परितः सुरासुराणाम्।
मुरभिन्मणिपादुके! महिम्ना
युगपत्तेषु समर्पितेव भासि॥ **21.4** ॥

उपनीतमुपायनं सुरेन्द्रैः
प्रतिबिम्बच्छलतस्त्वयि प्रविष्टम्।

स्वयमेव किल प्रसादभूम्ना
    प्रतिगृह्णासि मुकुन्दपादुके ! त्वम् ॥ **21.5** ॥

रङ्गेश्वरस्य नवपल्लवलोभनीयौ
    पादौ कथन्नु कठिना स्वयमुद्वहेयम्।
इत्याकलय्य नियतं मणिपादुके ! त्वं
    पद्मास्तरं वहसि तत्प्रतिबिम्बलक्षात् ॥ **21.6** ॥

पादार्पणात् प्रथमतो हरिदश्मरम्ये
    मध्ये तव प्रतिफलन्मणिपादरक्षे !।
मन्ये निदर्शयति रङ्गपतिर्युगान्ते
    न्यग्रोधपत्रशयितं निजमेव रूपम् ॥ **21.7** ॥

यात्रावसानमधिगच्छति रङ्गनाथे
    विश्राणयस्यनुपदं मणिपादुके ! त्वम्।
प्रायः प्रयाणसमये प्रतिबिम्बितानां
    तीर्थावगाहमपरं त्रिदशेश्वराणाम् ॥ **21.8** ॥

उच्चावचेषु तव रत्नगणेषु मातः !
    वेधाः प्रयाणसमये प्रतिबिम्बिताङ्गः।
आशङ्कते मुरभिदो मणिपादुके ! त्वाम्
    आगामिकल्पकमलासनपङ्क्तिगर्भाम् ॥ **21.9** ॥

आलोलरश्मिनियतां मणिपादुके ! त्वाम्
    आरुह्य सञ्चरति रङ्गपतौ सलीलम्।
अन्तःपुरेषु युगपत्सुदृशो भजन्ते
    डोळाधिरोहणरसं त्वयि बिम्बिताङ्ग्यः ॥ **21.10** ॥

कालेषु राघवपदावनि ! भक्तिनम्रः
    कार्याणि देवि ! भरतो विनिवेदयंस्ते।

त्वद्रत्नबिम्बिततयाऽपि मुहुः स्वकीयां
    राजासनस्थितिमवेक्ष्य भृशं ललज्जे ॥ **21.11** ॥

प्रत्यागते विजयिनि प्रथमे रघूणां
    विन्यस्यति त्वयि पदं मणिपादरक्षे !।
रत्नौघबिम्बितनिशाचरवानरां त्वां
    पूर्वक्षणस्थमिव पुष्पकमन्वपश्यन् ॥ **21.12** ॥

वैयाकुलीं शमयितुं जगतो वहन्त्या
    रक्षाधुरां रघुधुरन्धरपादरक्षे !।
प्राज्यं यशः प्रचुरचामरबिम्बलक्षात्
    प्रायस्त्वया कबळितं प्रतिभूपतीनाम् ॥ **21.13** ॥

प्रतिदिशमुपयाते देवि ! यात्रोत्सवार्थं
    त्वयि विहरणकाले बिम्बिते जीवलोके।
वहसि मणिगणैस्त्वं पादुके ! रङ्गभर्तुः
    कबळितसकलार्थां काञ्चिदन्यामवस्थाम् ॥ **21.14** ॥

भगवति गरुडस्थे वाहनस्थाः सुरेन्द्राः
    त्वयि विनिहितपादे भूमिमेवाश्रयन्ति।
तदपि चरणरक्षे ! रत्नजाले त्वदीये
    प्रतिफलितनिजाङ्गास्तुल्यवाहा भवन्ति ॥ **21.15** ॥

स्वच्छाकारां सुरयुवतयः स्वप्रतिच्छन्दलक्ष्यात्
    गाहन्ते त्वां प्रणतिसमये पादुके ! साभिमानाः।
स्त्रीरत्नानां परिभवविधौ सृष्टिमात्रेण दक्षां
    नीचैः कर्तुं नरसखमुनेरूर्वशीमूरुजाताम् ॥ **21.16** ॥

स्वेच्छाकेळिप्रियसहचरीं स्वच्छरत्नाभिरामां
    स्थाने स्थाने निहितचरणो निर्विशन् रङ्गनाथः।

सञ्चारान्ते सह कमलया शेषशय्याधिरूढः
त्यक्त्वाऽपि त्वां त्यजति न पुनः स्वप्रतिच्छन्दलक्षात् ॥ **21.17** ॥

त्वामेवैकामधिगतवतः केळिसञ्चारकाले
पार्श्वे स्थित्वा विनिहितदृशोः पादुकेऽनन्यलक्ष्यम् ।
त्वद्रत्नेषु प्रतिफलितयोर्नित्यलक्ष्यप्रसादा
पद्माभूम्योर्दिशति भवती पादसेवां मुरारेः ॥ **21.18** ॥

एकामेकः किल निरविशत्पादुके ! द्वारकायां
क्रीडायोगी कृतबहुतनुः षोडशस्त्रीसहस्रे ।
शुद्धे देवि ! त्वदुपनिहिते बिम्बितो रत्नजाले
भुङ्क्ते नित्यं स खलु भवतीं भूमिकानां सहस्रैः ॥ **21.19** ॥

हरिपदनखेषु भवती प्रतिफलति तव तदपि रत्नेषु ।
उचिता मिथः पदावनि ! बिम्बप्रतिबिम्बता युवयोः ॥ **21.20** ॥

॥ इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे बिम्बप्रतिबिम्बपद्धतिः एकविंशी ॥

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥